Shree Raghunath Sanskrit Research Institute Library, Jammu

No. ५६५- घ

Title रसमञ्जरी

Author भानुदत्त मिश्रः

Extent १२ Age १६२८

Subject अलंकारशास्त्रम् सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ५-६५-घ

रसमञ्जरी

नं० ५६५-घ

पत्राणि १२ (संपूर्णम्)

९२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सं. ८९ जेष्ठ प्र. ६ पुस्तक मदनपारिजात मूलपत्र २५१ इसवि चउत्तरार्द्धे देपत्रे ५० अखरेंसी

पंजाह पंडित श्री गोकल जी निवासी श्री त्रिलोकनाथ जी दा ग्रंथ ए दे पत्रे लिखरे बासो लताहन सें

लिखीकरी सं. ८९ ज्येष्ठ बदि ८ गुलि लिखीकरी लिखीसुदानेदे घरदेई घर डरो इसविच माही

श्री वजेश्वरी तथा श्री त्रिलोकनाथ जीजे ... होवें तां क्रोहि हजूरी देवते पाद

लिखतं पंडित गोकल मदन पारी उदे दे पत्रे प. जाह नकारा देजनवपो हया सो उपरालीम

जात

प्रमाण

श्रीगणेशायनमः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः ॥ ओं आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशंकया ॥ तल्पे
किं च मृगत्वचा विरचिते निद्राति भागैर्निजैरंतः प्रेमभरालसां प्रियतमामंगे दधानो हरः ॥ १ ॥ विद्वत्कुलमनोभृंगरसव्यासं
गहेतवे ॥ एषा प्रकाश्यते श्रीमद्भानुना रसमंजरी ॥ २ ॥ तत्र रसेषु शृंगारस्याभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिका ताव
न्निरूप्यते ॥ सा च त्रिविधा ॥ स्वकीया परकीया सामान्या चेति ॥ तत्र स्वामिन्येवानुरक्ता स्वीया न च परिणीतायां परगामिन्यामव्या
प्तिः ॥ अत्र पतिव्रताया एव लक्ष्यत्वात् ॥ तस्याश्च परगामितया परकीयात्वमपि समायाति ॥ अस्याश्चेष्टा ॥ भर्तुः शुश्रूषा शीलसं
रक्षणमार्जवं क्षमा च ॥ यथा ॥ गतागतकुतूहलं नयनयोरपांगावधि स्मितं कुलनतभ्रुवामधर एव विश्राम्यति ॥ वचः प्रियत
मश्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥ ३ ॥ स्वकीया त्रिविधा ॥ मुग्धा मध्या प्रगल्भा च ॥ तत्रां
कुरितयौवना मुग्धा ॥ सा चाज्ञातयौवना ज्ञातयौवना च ॥ सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा ॥ सैव क्रमशः ॥ सप्रश्र
या विश्रब्धनवोढा ॥ अस्याश्चेष्टा ॥ क्रियाक्रिया मनोहरा कोपमार्दवं नवविभूषणे समीहा ॥ मुग्धा यथा ॥ आज्ञप्तं किल कामदे
वधरणीपालेन काले शुभे वक्षो वास्तुविधिं विधास्यति तनौ तारुण्यमेणीदृशः ॥ दृष्ट्वैवं जनताचकोरनिवहश्चामोदाधरी ।
माधुरी वाचां किं च सुधामसृणलद्धूरी लावण्यमामंत्र्यते ॥ ४ ॥ अज्ञातयौवना यथा ॥ नीरान्नीरमुपागतान्यवनयोः सी ।
म्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञात्वा तं करं न्यस्यति ॥ शैवालांकुरशंकया शशिमुखी रोमावलीं प्रोंछति
श्रांतास्मीति मृदुः सालीमविदितश्रोणीभराहट्टकृति ॥ ५ ॥ ज्ञातयौवना यथा ॥ स्वयंभूः शंभुरंभोजलोचने त्वत्पयोधरः
नखेन कस्य धन्यस्य चंद्रचूडो भविष्यति ॥ ६ ॥ नवोढा यथा ॥ दृष्टे स्फुटतापि शयने विनिवेशितापि क्रोडे कृतापि यतते बहि

र॰ मं॰ १

श्री ४

ॐ॰ १

देवगंते ॥ जानीमहे नववधूरथ तस्य वश्या यः पारदं स्थिरयितुं क्षमते करेण ॥७॥ विश्रब्धनवोढा यथा ॥ दरकुड्मलि
तनेत्रपालिनी नीवीनियमितबाहुकंतोरुयुग्मबंधं ॥ करकलितकुचस्थलं नवोढा स्वपिति समीपमुपेत्य कस्य सूनः ॥
८ ॥ समानलज्जामदनमध्यमा ॥ एषैव चातिप्रश्रयातिविश्रब्धनवोढा ॥ अस्याश्चेष्टा ॥ मानगमिप्रेयसि धैर्यैर्वक्रोक्तिर
धैर्यपरुषवाक् ॥ यथा ॥ स्वापे प्रियाननविलोकनहानिरेव स्वापस्तुतौ प्रियकरग्रहणप्रसंगः ॥ इत्थं सरोरुहदृशा विप
दि चिंतयंती स्वापं विधातुमुपि दातुमपि प्रपेदे ॥९॥ पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा ॥ वेश्यायां कु॰
लटायां पतिमात्रविषयत्वाभावान्न तत्रातिव्याप्तिः ॥ अस्याः स्मरतिप्रीतिरानंदात्संमोहः ॥ प्रथमं यथा ॥ संस्पृश्य स्तन
माकलय्य वदनं संश्लिष्य कंठस्थलं निःपीड्याधरबिंबमंबरमपाकृष्य मुदस्यालकं, देवस्यांबुजिनीपतेः समुदयं जि
ज्ञासमाने प्रिये, वामाक्षी वसनांचलैः श्रवणयोर्नीलोत्पलैर्निह्नुते ॥१०॥ द्वितीयं यथा ॥ नखक्षतमुरस्थले धरदले
रदस्य व्रणं च्युता बकुलमालिका विगलिता च मुक्तावलिः ॥ रतांतसमये मया सकलमेतदालोकितं स्मृतिः क्व च र
तिः क्व च क्व च तवालिखिता विधिः ॥ मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे ॥ धीरा अधीरा धीराधीरा चेति ॥ व्यं
ग्यकोपप्रकाशा धीरा अव्यंग्यकोपप्रकाशा अधीरा ॥ व्यंग्याव्यंग्यप्रकाशा धीराधीरा चेति ॥ इयांस्तु विशेषः ॥ मध्याधी
रायाः कोपस्य गीर्व्यंजिका ॥ अधीरायाः परुषा वाक् ॥ धीराधीरायाश्च वदनरुदिते प्रकाशके ॥ प्रौढायास्तु धीरायाः
धीरायारतौदास्यं तर्जनताडनादिकोपस्य प्रकाशकं ॥ धीरादिभेदाः स्वीयाया एव परकीयाया इति प्राचीनलिख
नमाज्ञामात्रं ॥ धीरत्वमधीरत्वं तदुभयं वा माने नियतं ॥ परकीयाया मानश्चेत्तेषामप्यावश्यकत्वात् ॥ मानश्च

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नपरकीयायाइतिवक्तुमशक्यत्वात् ॥ मध्याधीरायथा । लोलालिपुंजेव्रजतोनिकुंजेस्फारंनबद्धंश्रमवारिधाराः ॥ दे
हेसमीहेभवतोविधातुंधीरंसमीरंनलिनीदलेन ॥ १२ ॥ मध्याअधीरायथा ॥ जातस्तेनिशिजागरोममपुनर्नेत्रांबुजे
शोणिमानिःपीतंभवतामधुप्रवितितंव्याघूर्णितंमेमनः ॥ आम्पर्डुंगाघनेनिकुंजेजलवनेलब्धंत्वयाश्रीफलंपंचेषुःस्तु
नरेषमांबद्धतरैःक्रूरैःशरैःहंतति ॥ १३ ॥ मध्याधीराधीरायथा । कांतानुरागचतुरोसिमनोहरोसिनाथोसिकिंचनव
यौवनभूषितोसि ॥ इत्थंनिगद्यसुदृशावदनेप्रियस्यनिःश्वस्यबाष्पकलितानिहितादृगंताः ॥ १४ ॥ प्रौढाधीरायथा
नोतल्पंभजसेनजल्पसिसुधाधारानुकारांगिरोदृक्पातंकुरुषेनवापरिजनेक्रोधप्रकाशच्छलात् ॥ इत्थंकेतकगर्भ
गौरिदयितेकोपस्यसंगोपनंतत्स्यादेवभवेत्पुनःसहचरीकुर्वीतसाचिस्मितं ॥ १५ ॥ प्रौढाअधीरायथा ॥ प्रतिपा
लमवलोक्यस्वीयमिंदोःकलायांहरशिरसिपरस्यादास्समाशंकमाना । गिरिशमचलकन्यातर्जयामासकंपप्र
चयचलयदेहल्लकांतिभाजाकरेण ॥ १६ ॥ प्रौढाधीराधीरायथा । तल्पोपांतमुपेयुषिप्रियतमेवक्रीकृतग्रीवयाका
कूव्याकुलवाचिसाचिहसितस्फूर्जत्कपोलश्रिया । हस्तन्यस्तकरेपुनर्मृगदृशालालातरसत्तालितप्रोष्ठीशठस्यू
खमांसलकुचोविस्फारितोद्दृष्टयः ॥ १७ ॥ एतेचधीरादिषड्भेदाद्विधा । ज्येष्ठाकनिष्ठाच ॥ धीराज्येष्ठाकनिष्ठाचअधी
र॰ मं॰ २ राज्येष्ठाकनिष्ठाच ॥ धीराधीराज्येष्ठाकनिष्ठाच । परिणीतत्वेसतिभर्तुरधिकस्नेहाज्येष्ठा ॥ परिणीतत्वेसतिभर्तुर्न्यू
नस्नेहाकनिष्ठा ॥ अधिकस्नेहासन्यूनस्नेहासुसामान्यवनितासुनातिव्याप्तिः ॥ परिणीतपदेनतद्व्यावर्तनात् ॥ धी ऊं॰
राज्येष्ठाकनिष्ठाचयथा ॥ एकस्मिन्शयनेसरोरुहदृशोर्दृष्ट्वायनिद्रांतयोरेकांपल्लवितावगुंठनपटामुत्कंधरोह २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ष्टवान्॥ अन्यस्याः सविधं समेत्य निभृतव्यालोलहस्तांगुलिव्यापारैर्वसनांचलं चपलयन्स्वापच्युतिं लब्धवान्॥१८॥
अधीरज्येष्ठाकनिष्ठा च यथा॥ अंतःकोपकषायिते प्रियतमे पश्यन्घने कानने पुष्पस्यावचयाय नम्रवदनामेकां स
मायोजयत्॥ अर्धोन्मीलितलोचनांचलचमत्काराभिरामाननां स्मेराद्रीधरपल्लवां नववधूमन्यां समालिंगति॥१९
धीराधीराज्येष्ठाकनिष्ठा च यथा॥ धैर्याधैर्यपरिग्रहग्रहिलयोरेणीदृशोः प्रीतये रत्नद्वंद्वमनंतकांतिरुचिरं सृष्टिद्वये
न्यस्तवान्॥ एकस्याः कलयन्करे प्रथमतो रत्नं परस्याः प्रियो हस्ताद्धस्तमिषात्स्पृशन्कुचतटीमानंदमाविंदति॥२०॥
अप्रकटपरपुरुषानुरागा परकीया॥ सा च द्विविधा॥ परोढा कन्यका च॥ कन्यकायाः पित्राद्यधीनतया परकीयता
अस्या गुप्तैव सकला चेष्टा॥ परोढा यथा॥ अयं रे वाकुंजः कुसुमशरमेवाससमुचितः समीरोयं वेलानवविदलदेलाप
रिमलः॥ इयं प्रावृट्शून्या नवजलदविन्याससचतुरा पराधीनं चेतः सखि किमपि कर्तव्यमृगयते॥२१॥ गुप्ताविद
ग्धालक्षिताकुलटानुशयाना मुदिताप्रभृतीनां परकीयायामेवांतर्भावः॥२२॥ गुप्ता त्रिविधा॥ वृत्तसुरतगोप
नावर्तिष्यमाणसुरतगोपनाद्वृत्तवर्तिष्यमाणसुरतगोपनाच॥ त्रितयमपि यथा॥ श्वश्रूः कुप्यतु निर्दयंतु
सुहृदो निंदंतु वा यातरस्तस्मिन्किंतु न मंदिरे सखि पुनः स्वापो विधेयो मया॥ आखोराक्रमणोपकोणकुहरादु
त्कालमातन्वती मार्जारेण खरैः खरैः क्षतवती कांकां न मे दुर्दशां॥२३॥ विदग्धा द्विविधा॥ वाग्विदग्धा क्रिया
विदग्धा च॥ वाग्विदग्धा यथा॥ निविडतमतमालवल्लिमल्लीविचकिलराजिविराजितोपकंठे॥ पथिकसमु
चितस्तवाद्य नीव्रे सवितरि तत्र सरित्तटे निवासः॥२४॥ क्रियाविदग्धा यथा॥ दासाय भवननाथे वदरीमपने

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्तमादिशति ॥ इमं ते दक्षिणाक्षीपयसि क्षणरं विनिक्षिपति ॥ १४ ॥ लक्षिता यथा ॥ यद्भूतं तद्भूतं यद्भूयात्तदपि वा-
भूयात् ॥ यद्भवति तद्भवति वा विफलस्तव कोपि गोपनायासः ॥ १५ ॥ कुलटा यथा ॥ एते वारिकणान्किरंति पुरुषा
न्वर्षंति नांभोधराः शैलाः शाड्वलमुद्गमंति न हठात्तत्यैते पुनर्नायकान् ॥ त्रैलोक्ये तरवः फलानि सुवते नैवात्मभंते
त्तनान्यातः कातरमालपामि कुलटा हेतोस्त्वया किं कृतं ॥ १६ ॥ अनुशयना यथा ॥ वर्तमानस्थानविघटने
न भाविस्थानाभावशंकया स्वानधिष्ठितसंकेतस्थले भर्तुर्गमनानुमानेन वानुशयाना भवति ॥ अन्यैकमु
दाहरणानि ॥ समुपागतवति चैत्रे निपतति पत्रेलवंगलतिकायाः ॥ सुदृशः कपोलपाली शिव शिव तालीद
३ लयति लेभे ॥ १७ ॥ निद्रालके किमिशुनानि कपोतपोतव्याहूतनूतनमहीरुहपल्लवानि ॥ तत्रापि तन्वि न
वनानि किर्यंति संति विघ्नस्तव प्रियतमस्य गृहं प्रयाहि ॥ १८ ॥ कर्णकल्पितरसालमंजरीपिंजरीकृतकपोल
मंडलः ॥ निःपतन्नयनवारिधारया राधया मधुरिपुर्निरीक्षितः ॥ १९ ॥ मुदिता यथा ॥ गोष्ठे गुरुतिष्ठति पतिर्ब-
धिराननो दानेत्रहृदयस्य नहि पाटवमस्ति यातः ॥ इत्यं निशम्य तरुणीकुचकुंभसीम्नि रोमांचकंचुकमुदंचितमा
ततान ॥ २० ॥ कन्यका यथा ॥ किंचित्कुंचितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं प्रांतभ्रांतविलोचनं घटति
र॰ भुजापर्यस्तकर्णोत्पलं ॥ अंगुल्या स्फुरदंगुलीयककरुचा गंडस्थकंडूयनं कुर्वाणा नृपकन्यका सुहृततिं सख्या
मं॰ त्तमालोकते ॥ २१ ॥ चित्तमात्रोपायिकमसकलपरपुरुषाभिलाषसामान्यवनिता ॥ तन्वग्निमित्रे क्षितिपतौ प्र- २
२ नुरक्तायामैरावत्यामव्याप्तिः ॥ तत्र चित्तमात्रोपायेरभावादिति चेत् ॥ मैवं ॥ सापि च काश्मीरक्षीरादिदाना-
॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिमद्वागतेनुरक्तानत्तमहर्षौ ॥ नेनावगम्यते तत्रापि वित्तमात्रोपाधिरिति ॥ सामान्यवनिता यथा ॥ दृष्ट्वा प्रांगा
णमन्निमीलो वद्भूधनं दातारमभ्यागतं वंद्यो ज्ञोतनुतः परस्परमिवाश्लेषं कुरंगीदृशः ॥ आनंदाश्रुपयोभिरुंचति
मङ्कुमौलाभिधान्कांतलोहदृष्टिः किंच धनागमं कथयितुं कर्णांतिकं गच्छति ॥ १४ ॥ एना अन्यसंभोगदुःखिता वक्रो
क्तिगर्विता मानवत्यश्चेति त्रिमो भवंति ॥ अन्यसंभोगदुःखिता यथा ॥ त्वं दूति निरगाः कुंजं न तु पापीयसो गृहं ॥ किं
शुकाभरणं देहं दृश्यते कथमन्यथा ॥ १५ ॥ वक्रोक्तिगर्विता द्विधा ॥ प्रेमगर्विता सौंदर्यगर्विता च ॥ प्रेमगर्विता य
था ॥ वपुषितवतनोतिरत्नभूषां प्रभुरिति यन्यतमास्मि किं ब्रवीमि ॥ सखि तनुनयनांतरालभीरुः कलयति मे
न विभूषणानि कांतः ॥ १६ ॥ सौंदर्यगर्विता यथा ॥ कलयति कमलोपमानमक्ष्णोः प्रथयति वाचि सुधारसस
माम्यं ॥ सखि कथय किमाचरामि कांते समजनि तत्र सहिष्णुतैव दोषः ॥ १७ ॥ मानवती यथा ॥ प्रियापराधसू
चिका चेष्टा मानः ॥ स च लघुर्मध्यमो गुरुश्च ॥ अल्पापनेयो लघुः कष्टतरापनेयो मध्यमः कष्टतमापनेयो गु
रुः ॥ असाध्यस्तु रसाभासः ॥ अपरस्त्रीदर्शनादिजन्मा लघुः ॥ गोत्रस्खलनादिजन्मा मध्यमः ॥ अपरस्त्रीसं
गमादिजन्मा गुरुः ॥ अन्यथासिद्धकान्तहलाद्यपनेयो लघुः ॥ अन्यथावादशपथाद्यपनेयो मध्यमः ॥ च
रणपातभूषणदानाद्यपनेयो गुरुः ॥ अपरस्त्रीदर्शनादिजन्मा यथा ॥ स्वेदांबुभिः क्वचन पिच्छिलमंगभू
मौ भानोदरि क्वचन कंटकितं चकास्ति ॥ अन्यां विलोकयति भाषयति प्रिये पि मानः क्व दास्पति पदं तव तन्व
वि[illegible]ः ॥ १८ ॥ गोत्रस्खलनादिजन्मा यथा ॥ यन्नोत्रस्खलनं तत्र श्रमो यदि न मन्यसे ॥ रोमालिव्यालसंस्पर्शो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शपथं तत्र कारय ॥ ६९ ॥ अपरां गननां संगमत्तन्माय यथा ॥ दयितस्य निरीक्ष्य भालदेशं चरणालक्तकपिंजरं स-
पत्न्याः ॥ सुदृशो नयनस्य कोणभासाः स्मितमुक्ताः शिशिरोपमा बभूवुः ॥ ७० ॥ एताः षोडशाप्यष्टाभिरवस्थाभिः प्रत्ये-
कमष्टविधाः ॥ प्रोषितभर्तृका ॥ १ ॥ खंडिता ॥ २ ॥ कलहांतरिता ॥ ३ ॥ विप्रलब्धा ॥ ४ ॥ उत्का ॥ ५ ॥ वासकसज्जा ॥ ६ ॥
स्वाधीनपतिका ॥ ७ ॥ अभिसारिका चेति ॥ ८ ॥ गणनादष्टाविंशत्यधिकं शतं भेदा भवंति ॥ १२८ ॥ तासामपि उत्तम-
मध्यमाधमगणनया चतुरधिकाशीतियुतं शतत्रयं भेदा भवंति ॥ ३८४ ॥ यत्तु एतासां दिव्यादिभेदगणनया
द्विपंचाशदधिकशतयुतं सहस्रं भेदा भवंति ॥ ११५२ ॥ दिव्या इंद्राण्यादयः ॥ अदिव्या मालत्यादयः ॥ दिव्यादिव्याः
सीतादयः इति तन्न ॥ अवस्थाभेदेनैव नायिकाभेदात् ॥ दिव्यादिभेदेन भेदस्वीकारे ॥ अतीतानां नायकानाम-
प्येवमानंत्यं स्यात् ॥ तथा दिव्यादिव्यादिभेदा नायकानामपि संति ॥ इंद्रादयो दिव्याः ॥ अदिव्या माधवादयः ॥ दि-
व्यादिव्या अर्जुनादय इति ॥ यद्यपि मुग्धाया यथा धीराधीरादिभेदाभावस्तथाविधप्रज्ञासामग्र्यभावात्तथा-
ष्टविधत्वाभावोपि भवितुमर्हति ॥ तथापि प्राचीनलिखनानुरोधेन नवोढामालंब्यैते भेदा अवगंतव्याः ॥ दे-
शांतरगते प्रेयसि संतापव्याकुला प्रोषितभर्तृका ॥ उत्काकलहांतरिताविप्रलब्धानां पतिर्देशांतरगतो न
भवतीति न तत्रातिव्याप्तिः ॥ अस्याश्चाष्टादशावस्थाः ॥ मुग्धा प्रोषितभर्तृका यथा ॥ दुःखं दीर्घतरं वहन्त्यपि स-
खीवर्गाय नो भाषते शैवालैः शयनं सृजत्यपि पुनः शेते न वा लज्जया ॥ कंठे गद्गदवाचमंचति दृशा धत्ते न वाष्पो-
दकं संतापं सहते यदंबुजमुखी तद्वेद चेतोभवः ॥ ७१ ॥ मध्या प्रोषितभर्तृका यथा ॥ वासस्तदेव वपुषो वलयं

र. मं. ५

टीं. ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तदेव हृत्तस्य सैव तद्वनस्य स्य चरन्त कांची ॥ वाचालत्वं गता भृगे स्वरतो मम मन्मयापि किं भवति तन्मे वि किं निदानं
४० ॥ प्रौढा प्रोषितभर्तृका यथा ॥ माला बाला बुजदलमयी मौक्तिकी हारयष्टिः । कांची यातौ प्रभवति दृढो रोमहर्षः प्र-
स्थितेव ॥ अन्यद्भूमः किमपि धमनी वर्तते वा न वेति ज्ञातुं बाढं रद्धवलयं पाणिमूलं प्रयाति ॥ ४१ ॥ परकीया प्रो-
षितभर्तृका यथा ॥ श्वश्रूः पद्मदलं ददाति तदपि भ्रूसंज्ञया गृह्यते सद्यो मर्मर धांकया न च पुनः संस्पृश्यते पाणि-
ना ॥ यातं वीचिसहस्रमणस्य दक्षिमिमन्तुन्तरं दीयते श्वासः किं तु न मुच्यते कृतवहस्फूरः कुरंगीदृशा ॥ ४२ ॥ सामान्य-
वनिता प्रोषितभर्तृका यथा ॥ विरहं विदितमंतः प्रेम विज्ञाय कांतः पुनरपि वसतस्मादेत्य मे दास्यतीति ॥ मरिच-
निचयमदत्तोर्न्यस्य वाष्पोदबिंदून्विहसति पुरयोपि ह्वारदेशोपविष्टा ॥ ४३ ॥ अन्यसंभोगचिह्नितः प्रातराग-
च्छति पतिर्यस्याः सा खंडिता ॥ प्रातरित्युपलक्षणं ॥ अस्याश्चेष्टा ॥ अस्फुटालापचिंतासंतापनिःश्वासतूष्णींभा-
वास्रुपातादयः ॥ मुग्धा खंडिता यथा ॥ वक्षोजचिह्नितमुरो दयितस्य वीक्ष्य दीर्घं न निःश्वसिति जल्पति नैव किं-
चित् ॥ प्रातर्जलेन वदनं परिमार्जयंती बाला विलोचनजलानि तिरोदधाति ॥ ४४ ॥ प्रौढा खंडिता यथा ॥ मा-
मुद्वीक्ष्य विपक्षपक्ष्मलदृशः पादांबुजालक्तकैः रालिमानननमानतीकृतमुखी चित्रार्पितेवाभवत् ॥ दृष्टं नोक्त-
वती न वा कृतवती निःश्वासकोष्णीदृशो प्रातर्मंगलमंगनाकरतलादादर्शमादर्शयत् ॥ ४५ ॥ परकीया खंडिता
यथा ॥ कांतं निरीक्ष्य वलयांकितकंठदेशमुक्ता सत्या परभिया परुषा न वाचः ॥ दूतीमुखे मृगदृशा सबलं दंभुपूरा
दूरात्परं निदधिरे नयनांतपाताः ॥ ४६ ॥ सामान्यवनिता खंडिता यथा ॥ उरो नखपयोधरांकितमिदं कृतो मे तमा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ततोवस्तुनिधीयतांमयिपुरायदंगीकृतं॥इतिप्रचलचेतसःप्रियतमस्यबारंस्त्रियाःक्वणत्कनककंकणंकरत
लात्समाकृष्यते॥४८॥पतिमवमन्यपश्चात्परितप्ताकलहांतरिता॥अस्याश्चेष्टा॥भ्रांतिसंतापसंमोहनिःश्वासस्व
रप्रलापादयः॥मुग्धाकलहांतरितायथा॥अनुनयतिपतिंनलज्जमानाकथयतिनापिसखीजनायकिंचित्॥
प्रसरतिमलयानिलेनवोढावहतिपरंतुचिरायशून्यमंतः॥४९॥मध्याकलहांतरितायथा॥विरमतिकथ
नंविनाननखेदःसतिकथनेसमुपैतिकापिलज्जा॥इतिकलहमथोमुखीसखीभिर्विम्बोलपितमनालपितंसमाचको
त॥५०॥प्रौढाकलहांतरितायथा॥अकरोत्किमुनेत्रशोणिमानंकिमकार्षीःकरपल्लवान्निरोधं॥कलहंकिमधः
कृथाःकृतेहितमर्थंनविदंतिदेवदुष्टाः॥५१॥परकीयाकलहांतरितायथा॥भर्तुर्यत्स्पृहतेगुरुर्लघुरहःक्रोष्टीक
निष्ठीकृतायैयंक्रोधाधनंगतेमद्वचसीनीतिःकृताहूरतः॥निर्मुक्तास्तृणवत्त्रपापरिचितास्त्रोतस्विनीविड्वतस्वक्रो
धाद्ववीरितोवतमयामातर्वलीयान्विधिः॥५२॥सामान्यवनिताकलहांतरितायथा॥यत्पंकेरुहलक्ष्मपाणि
कमलेभाग्यालयेयत्कृतंन्यस्तंवाममयाल्ललाटफलकेभाग्याक्षरंवेधसा॥तत्सर्वंसखिविप्रयोगपयार्थमकरोत्तस्मिन्
प्रकोपःकृतोधिक्शांधिक्प्रमजीविनंधिगनतनुंधिक्कोष्ठितंधिग्वयः॥५३॥संकेतनिकेतनेप्रियमनवलोक्यसमा
रसमं कुलहृदयाविप्रलब्धा॥अस्याश्चेष्टा॥निर्वेदनिःश्वाससखीजनोपालंभचिंतास्त्रुपातमूर्छादयः॥मुग्धाविप्रल
५ ब्धायथा॥आलीभिःशपथैरनीककपटैःकुंजोदरंनीतयाशून्यंतत्त्वनिरीक्ष्यविस्मितयानप्रस्थितंनस्थितं॥न्य उं
स्याःकिंनुनवोढनीरजदृशाकुंजोपकंठेरुषातामुस्फुंगकदंबडंबरचमत्कारस्पृशोदृष्टयः॥५४॥मध्यविप्रलब्धा ५

5

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यथा॥ संकेतकेलिगृहमेत्य निरीक्ष्य शून्यमेणीदृशो निहितनिःश्वसिताधरायाः॥ अर्धोक्तवं वचनमर्धविकासि
नेत्रं तांबूलमर्धकवलीकृतमेव तस्थौ॥ ५५॥ प्रौढाविप्रलब्धा यथा॥ शून्यं कुंजगृहं निरीक्ष्य कुटिलं विज्ञाय चेतो
भवं दूतीनापि निवेदिता सहचरी दृष्टापि नो वा तया॥ शंभो शंकर चंद्रशेखर हर श्रीकंठ शूलिन् शिव त्रायस्वे
ति परं तु पंकजदृशा भर्गस्य चक्रे स्तुतिः॥ ५६॥ परकीयाविप्रलब्धा यथा॥ दत्वा धैर्यभुजंगमूर्ध्नि चरणं तुल्यं छलज्ञा
नदीमंगीकृत्य घनांधकारपटलं तन्व्या न दृष्टः प्रियः॥ संतापाकुलया तया च परितः पाथोधरे गर्जति क्रोधात्क्रो
तद्धृतां तमतनुमद्विषप्रोत्पादृशो योजिते॥ ५७॥ सामान्यवनिताविप्रलब्धा यथा॥ कपटवचनभाजा केनचिद्दा
रयोषा सकलरसिकगोष्ठीवंचिका वंचिता सो॥ इति विहसति दिंगङ्कंगविक्षिप्तचक्षुर्विकचकुसुमकांतिच्छ
द्मना केलिकुंजः॥ ५८॥ संकेतस्थलं प्रति भर्तुरनागमकारणं सा उत्का॥ अवधिदिवसानागते प्रेयसि प्रोषित
पतिकायां नातिव्याप्तिः॥ तस्या भर्तुरवधिदिवसेन भवनगमननियम इति संकेतपदेन तद्व्यावर्तनात्॥ अ
स्याश्चेष्टा॥ अरतिसंतापजृंभाअंगमोटनकंपरुदितावस्थाकथनादयः॥ मुग्धा उत्का यथा॥ यन्नाद्यापि स
मागतः प्रिय इति प्रायः प्रपेदे परामित्थं चेतसि चिंतयत्यपि सखीं न व्रीडया पृच्छति॥ दीर्घं निःश्वसितं ददाति
चकितं न प्रेक्षते केवलं किंचिन्पक्वपलांडुपांडुरुचिं धत्ते कपोलस्थली॥ ५९॥ मध्या उत्का यथा॥ आनेतुं न ग
ता किमु प्रियसखी भीतो भुजंगात्किमु क्रुद्धो वा प्रतिषेधवाचि किमसौ प्राणेश्वरो वर्तते॥ इत्थं कर्णसुवर्णकेत
करजःपातो पयानस्थलाद्दत्णोः कापि नवोढनीरजमुखी वाष्पोदकं मुंचति॥ ६०॥ प्रौढा उत्का यथा॥ आतनि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कुंजसमविटपूधिरमालवंधोमातस्तमस्विनिपिततिमिरप्रसीद॥ इच्छामिकिंचिदतिनीरथरामिरामोदामोदरःकथ
यकिंनसमाजगाम॥ ६१॥ परकीयाउत्कायथा॥ स्नातंवारिदवारिभिर्विरचितोवामोघनेकाननेगीनेश्चंदनविंदुभि
र्मनसिजोदेवःसमाराधितः॥ नीताजागरणव्रतेनरजनीव्रीडाहतादक्षिणनमंकिंनतपस्तथापिसकथंनाद्यापि
नेत्रातिथिः॥ ६२॥ सामान्यवनिताउत्कायथा॥ कथंनकांतःसमुपैतिकुंजमित्थंचिरंचेतसिचिंतयंती॥ अन्तालय
न्निपतद्दृग्धारावारांगनाकापिधनाभिलाषात्॥ ६३॥ अद्यमेप्रियवारइतिनिश्चित्ययास्मरतसामग्रीसंपादनंकरो
तिसावासकसज्जा॥ वासकोवारः॥ अस्याश्चेष्टा॥ मनोरथसखीपरिहासदूतीप्रश्नसामग्रीसंपादनमार्गविलोकना
दयः॥ मुग्धावासकसज्जायथा॥ द्वारंगुंफतितारकांतिरुचिरंग्रथ्नातिकांचीलतांदीपंन्यस्यतिकिंतुतत्रबकुले
स्तेदंनदत्तेपुनः॥ आलीनामितिवासकस्यरजनौकामानुरूपांक्रियांमाचिस्मेरमुखीनवोढसमुखीहूतास्ममुद्वी
क्षते॥ ६४॥ मध्यावासकसज्जायथा॥ शिल्पंदर्शयितुंकरोतिकुतुकात्कर्पूरहारस्रजंचित्रप्रेक्षणकैतवेनुकिम
पिद्वारंसमुद्वीक्षते॥ एकान्याभरणेनवंसहचरीभूषाविशेषाभिषादित्थंप्रपन्नदृशःप्रतीत्यचरितंस्मेराननोभूत्स्म
रः॥ ६५॥ प्रगल्भावासकसज्जायथा॥ कृतंवपुषिभूषणंचिकुरयोरणीभूषिताकृतापायनसन्निधौक्रमुकवीटिका
संभृतिः॥ अकारिहरिणीदृशाभवनमेत्यदेहत्विषास्फुरत्कनककेतकीकुसुमकांतिभिर्दुर्दिनं॥ ६६॥ मनोरथस्त
यथा॥ आवयोरंगयोर्द्वैतेभूयोविरहविप्लवः॥ अद्वैतेचस्मितपीतंतस्मादन्योन्यवीक्षणं॥ ६७॥ परकीयावासक
सज्जायथा॥ श्वश्रूंस्वापयतिच्छलेनचतिरोधत्तेप्रदीपांकुरान्यत्नेसौधकपोतपोतनिनदैःसांकेतिकंचेष्टितं॥

र॰ मं॰ ६

6

ओं॰ ६

शश्वत्या र्धविवर्तितां गलतिकं गोलत्कपोलघ्नतिक्कापिक्कापिककरांबुजं प्रियधियानल्पांतिकेन्यस्यति ॥ ६८ ॥ सा
मान्यवनितावासकसज्जा यथा ॥ चोलं नीलनिचोलकर्षणविधौ चूडामणिं चुंबने याचिष्येक्तुचयोः करार्पण
विधौ कांचीं पुनः कांचनीं ॥ दृश्यं चंदनचर्चितेर्न्द्रिगामदे रंगानि संस्कुर्वती तत्किं यन्न मनोरथं वितनुते वारेभुवा
रांगना ॥ ६९ ॥ सदाज्ञाकरप्रियतमा साधीनपतिका ॥ अस्यास्त्वेष्टावनविहारादिमदनमहोत्सवामदाहंकार
मनोरथावाप्तिप्रभृतयः ॥ मुग्धास्वाधीनपतिका यथा ॥ मध्येन क्रशिमा स्तनेन गरिमा देहेन वा कांतिमाश्रो
णीन प्रथिमा गतो न जडिमा नेत्रेन वा वक्रिमा ॥ लास्येन द्रढिमा न वाचि पटिमा हास्येन वा स्फीतिमा प्राणेशा
स्य तथापि मत्तिमनो मध्येव किं कारणं ॥ ७० ॥ मध्यास्वाधीनपतिका यथा ॥ यदपि रतिमहोत्सवेन कार्येयद
पि करेण च नीविधारणानि ॥ प्रियसखि पतिरेष पार्श्वदेशांतदपि न संचति चेत्किमाचरामि ॥ ७१ ॥ प्रौढास्वाधी
नपतिका यथा ॥ वक्रस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य वा धन्यानामरविंदसुंदरदृशां कांतस्तनोति
स्तुतिं ॥ स्वप्नेनापि न गच्छति प्रथं चेतः पथं दृक्पथं काप्यन्या दयितस्य मे सखि कथं तस्यास्तु भेदग्रहः ॥ ७२
परकीयास्वाधीनपतिका यथा ॥ स्वीयाः संति गृहे सरोरुहदृशो यासां विलासः क्षणं कांचीकुंडलहेमकंक
णरणत्कारेण विश्राम्यति ॥ किंहेतुः सखि काननेषु रपथे सौधीसवीसन्निधो श्राम्यंतीमपि वल्लभस्य पतितो
दृष्टिर्न मां संचति ॥ ७३ ॥ सामान्यवनितास्वाधीनपतिका यथा ॥ संत्येव प्रतिमंदिरे मृगदृशो यासां सदा साग
रत्नोतः स्मृतमनोज्ञसंदरचमत्काराद्दृशो विभ्रमाः ॥ चित्रं किं तु विचित्रमन्मथकलावैशद्यहेतोः पुनर्वि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्तं चिंतदूरे प्रयच्छति युवामय्येव किंकारणं ॥७४॥ स्वयमभिसरति प्रियमभिसारयति वायासाभिसारिका ॥ अ
स्याश्चेष्टा ॥ समयानुरूपभूषणं शंकाप्रज्ञानैपुण्यकपटसाहसादयः ॥ इति परकीयायाः स्वीयायास्तु प्रकृत
एव क्रमः ॥ मुग्धाभिसारिका यथा ॥ दूती विघ्नदुपागता सहचरी रात्रिः सहस्थायिनी देवज्ञो दिशति स्वनेन त्व
लदः प्रस्थानवेलां शुभां ॥ वाचं मांगलिकीं तनोति तिमिरस्तोमोपि रिलीरदेवर्जी तोयं दयिताभिसारसमयो
मुग्धे विमुंच त्रपां ॥७५॥ मध्याभिसारिका यथा ॥ भीतासि नैव भुजगात्पथि मज्जुजस्य संगे पुनः किमपि कंप
सीकरोषि ॥ अंभोधरध्वनिभिरस्तभितासि तन्वि मद्वाचि साचिवदनासि किमाचरामि ॥७६॥ प्रगल्भाभिसारिका
यथा ॥ स्फारडंबरमितजभारमंगुरांगी किसलयकोमलकांतिना पदेन ॥ अथ कथय कथं सहेतगंतुं यदि न निशा
समनोरथोरथः स्यात् ॥७७॥ परकीयाभिसारिका यथा ॥ रमसादभिसर्तुमुद्यतानां वनितानां सखि वारिदो
विवस्वान् ॥ रजनी दिवसोंधकारमर्चिर्विपिनं वेश्म विमार्ग एव मार्गः ॥७८॥ ज्योत्स्नाभिसारिका यथा ॥ चंद्रोद
रसमं ये चंदनमंगके सुविहस्य विन्यस्य विनिर्गतायाः ॥ मनोनिहंतं मदनोपि बाणान्करेण कोदान्विमर्शं वव ॥ अ
दिवाभिसारिका यथा ॥ पल्लीनामधिपस्य पंकजदृशा पर्वोत्सवामंत्रणे ज्ञाते सद्मजनामिथः कृतमहोत्साहं प्रः
प्रस्थिताः ॥ सव्याजं स्थितयोर्विहस्य गतयोः शुद्धांतमत्रांतरे यूनोः खिन्नकपोलयोर्विजयते कोप्येषकंठग्र
हः ॥८०॥ सामान्यवनिताभिसारिका यथा ॥ लोलल्लोलचमत्कृति प्रविलसत्कांचीलतां कंकृतिन्यंचत्कंचुकबंध उं.
बंधुरवलद्दोलत्कुंभो भवति ॥ स्फूर्जद्दीधितिविस्फुरत्कृतिचलच्चामीकरालंकृतिक्रीडाकुंजगृहं प्रयाति कृतिनः ७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कस्यापि वाराङ्गना ॥ ८ ॥ मुग्धाया लज्जाप्राधान्येन मध्यमाया लज्जामदनप्राधान्येन ॥ प्रगल्भायाः प्रकाश्यप्रा
धान्येन ॥ धीराया धैर्यप्राधान्येन अधीराया अधैर्यप्राधान्येन ॥ धीराधीराया धैर्याधैर्यप्राधान्येन ॥ ज्येष्ठायाः स्ने
हाधिक्यप्राधान्येन ॥ कनिष्ठायाः स्नेहन्यूनत्वप्राधान्येन ॥ परोढायाः संगुप्तिप्राधान्येन ॥ मुग्धाया इव कन्यका
याः ॥ सामान्यवनिताया धनप्राप्तिप्राधान्येनाष्टविधनायिकावर्णनमिति घोषः ॥ प्रस्थाने वलयैः कृतं प्रियस
खि रसैरस्रैरजस्रं कृतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः । यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्र
स्थिता गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते ॥ इत्यादि प्राचीनग्रन्थकारलिखनादग्रिमक्षणे देशा
न्तरगमननिश्चिते प्रेयसि प्रोष्यत्पतिकापि नवमी नायिका भवितुमर्हतीति ॥ तथा हि ॥ तस्याः प्रोषितपतिका
विप्रलब्धोत्कास्वनांतर्भावः ॥ कलहाभावादनवमानितपतित्वाच्च ॥ नापि खंडितायामंतर्भावः ॥ प्रियस्यान्यो
पभोगचिह्नितस्यागमनाभावात् ॥ प्रियायाः कोपाभावदर्शनात् ॥ काकुवचनकातरप्रेक्षणादिसूचितान्तः
पतपातदर्शनाच्च ॥ नवासकसज्जायामंतर्भावः ॥ वारनियमाभावात् ॥ सज्जीकरणाभावान्निर्वेदादिदर्शना
च्च ॥ न स्वाधीनपतिकायामंतर्भावः ॥ अग्रिमक्षण एव संगविच्छेददर्शनात् ॥ न हि स्वाधीनपतिकायाः कदाचि
दपि संगविच्छेद इति संप्रदायविदः ॥ व्रजन्नपि पतिः स्वाधीनपतिकया निरुध्यते ॥ अन्यथा भर्तरि स्वाधीन
त्वमेव तस्यामज्यपेते ॥ नेदं तथा सर्वथा भर्तुर्विदेशगमनात् ॥ किंच निर्वेदास्रुपातनिःश्वासवनविहारादि
मदनमहोत्सवव्यतिरेकदर्शनाच्च ॥ नाप्यभिसारिकायामंतर्भावः ॥ अभिसारोत्सवाभावात् ॥ अतस्तापदर्शि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

8

नाद्येति शुक्तिसुतस्य धामः ॥ लक्षणांतरं ॥ यस्याः पतिरग्रिमक्षणे देशांतरं यास्यत्येव सा प्रोष्यत्पतिका ॥ अस्याश्चेष्टा ॥
काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसंतापसंमोहनिःश्वासवाष्पादयः ॥ मुग्धा प्रोष्यत्पति-
का यथा ॥ प्राणेश्वरे किमपि जल्पति निर्गमाय तामोदरी वचनमानमयांचकार ॥ आलिः पुनर्निभृतमेत्य ल-
तांतिकं तमुन्मत्तकोकिलकलध्वनिमाततान ॥ ७४ ॥ मध्या प्रोष्यत्पतिका यथा ॥ गंतुं प्रिये वदति निःश्वसितं
न दीर्घमासीन्न वा नयनयोर्जलमाविरासीत् ॥ आसुर्लिपिं पठितुमेणदृशः परं तु भालस्थलीं किसलकचः स-
मुपाजगाम ॥ ७५ ॥ प्रौढा प्रोष्यत्पतिका यथा ॥ नायं मुंचति सुभ्रुवामपि तनुत्यागो वियोगज्वरस्तेनाहं विहि-
तांजलिरयं दुपते प्रस्थामि सत्यं वद ॥ तांबूलं कुरु मे पटीरमुदकं यद्वा दुभिर्दीयते स्यादत्रैव परत्र तत्किमु वि-
धत्वालावलीदुःसहम् ॥ ७६ ॥ परकीया प्रोषितपतिका यथा ॥ न्यस्तं पन्नगमूर्ध्नि पादयुगलं भक्तिर्विमुक्ता गु-
रोस्त्यक्तानीतिरकारि किं न भवतो र्दूतोऽमेया दुष्कृतं ॥ अंगानां गतयातनानयनयोः कोपि क्रमो गौरवः कुंभी-
पाकपराभवश्च मनसो युक्तो त्वयि प्रस्थिते ॥ ७७ ॥ सामान्यवनिता प्रोष्यत्पतिका यथा ॥ सुदूरं प्रदेहि वलया-
य भवद्वियोगमामाप्य यास्यति बहिः सहसा यदेतत् ॥ इत्थं निगद्य विगलन्नयनांबुधारा वारांगना प्रिय-
तमेकरयोर्बभार ॥ ७८ ॥ अहितकारिण्यपि प्रिये हितकारिण्युत्तमा ॥ अस्या उत्तमैव चेष्टा ॥ तद्यथा ॥ पतिः शा-
यनमागतः कुचविचित्रितोरःस्थलः प्रसन्नवचनामृतैरयमनर्पि वामभ्रुवा ॥ अचर्चि सुभगस्मितद्युतिपटी-
रपंकजैरक्षतिविलसद्विलोचनचमत्कृतैरंबुजैः ॥ ७९ ॥ हिताहितकारिणि प्रिये हिताहितचेष्टावती मध्य-

र॰ मं॰ ७

उं॰ ७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मा ॥ अस्यास्तु मवद्वारानुसारिणी चेष्टा ॥ यथा कांते सागसि केतुकस्पृशितया साचीकृतग्रीवया मुक्ताः को
पकषायमन्मथशरक्रूराः कटाक्षांकुराः ॥ साकूतेदरहासकेसरवचोमाध्वीकधारालसा प्रीतिः कल्पलता
चकाचनमहादानीकृता सुभ्रुवा ॥ ८८ ॥ ह्नितकाठिण्यपि प्रिये ह्नितकाठिण्यधमा । एषैव निर्निमित्तकोप
नाचंडीत्यभिधीयते ॥ अस्या निष्कारणकोपत्वाद्धर्मैव चेष्टा ॥ तद्यथा ॥ प्रस्थानेन तवयः करोति कमलस्था
यां मुखलोभी रुद्दे श्रीखंडद्रवधारया शिशिरया मार्गं पुरः सिंचति ॥ तस्मिन्प्रेयसि विद्रुमद्रवनदीसिंगात्तरं
गात्रमिश्रां तल्लीनतसरोजपत्र[illegible]दृशास्पद्योदृशाक्रम्य मि ॥ ८९ ॥ विस्तरभिया प्रत्येकमेता मास्तु नममध्यमाथ
मभेदा नोदाहृता इति ॥ विश्वासविश्रामकारिणी पार्श्ववर्तिनी सखी ॥ तस्या मंडनोपालंभशिक्षापरिहा
सप्रवृत्तीनि कर्माणि ॥ मंडनं यथा ॥ स्वनकनकमहीधरोपकंठे प्रियकरपल्लवसंकुलसत्प्रमोदं ॥ रहसि मा
करिकामिषाल्लिखंती कमलमुखीकमलैः सखीजघान ॥ ९० ॥ उपालंभो यथा ॥ सांद्रध्वानैर्मुखरितदिशः
श्रोणयस्तोयदानां धारासारैर्धरणिवलयं सर्वतः प्लावयंति ॥ तेन स्नेहं वहति विपुलं मन्मथावीप्सकमेव त्वं
निःस्नेहो यदसि तदिदं नाथ मे विस्मयाय ॥ ९१ ॥ शिक्षा यथा ॥ सानंदमालि वनमालि विलोकनाय निर्गच्छ
कुंजमिति किं तव विचारयेथाः ॥ झंकारिणो मधुकरा[illegible]दिवसे भ्रमंति रात्रौ पुनश्चपलचंचुपुटाश्च कोगाः ॥ ९२
परिहासो यथा ॥ आगारभित्तिलिखितास्तु निवेदयस्व कः सप्रमोद शरमूर्तिषु लोकभर्तुः ॥ इत्थं सखीजन
वचः प्रतिपद्य सद्यः सीताक्षितद्युतिभिरुत्तरयांचकार ॥ ९४ ॥ प्रियस्य परिहासवत्प्रिया या अपि परिहा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र॰ मं॰
५

९

सः ॥ यथा ॥ दिव्यं वारिकथं यतः सुरधुनी मौलौ कथं पावको दिव्यं तद्धि विलोचनं कथमहिर्दिव्यं स चांगे तव ॥ त
स्माद्द्यूतविधौ त्वयाद्य मुषितो हारः परित्यज्यतामित्थं शैलभुवा विदग्धलपितः शंभुः शिवायास्तु वः ॥ ९० ॥ दूत्य
व्यापारपारंगमा दूती ॥ तस्याः संघटनविरहनिवेदनादीनि कर्माणि ॥ संघटनं यथा ॥ अंचति रजनिरुदंचति
तिमिरमिदं दूति वंचति मनोभूः ॥ उक्तं न त्यज युक्तं विरचय रक्तं मनस्तस्मिन् ॥ ९१ ॥ विरहनिवेदनं यथा ॥ चक्रे चंद्र
मसौ प्रदीपकलिका राधा धरामंडले तस्या दैववशाद्दशापि चरमा प्रायः समुन्मीलति ॥ तद्ब्रूमः शिरसा नतेन स
हसा श्रीठलनिदिप्यतां स्नेहस्तत्र तथा यथा न भवति त्रैलोक्यमंधं तमः ॥ ९२ ॥ शृंगाररसोभयनिरूपणीयत्वान्ना
यकोपि निरूप्यते ॥ स च त्रिविधः ॥ पतिरुपपतिर्वैशिकश्चेति ॥ विधिवत्पाणिग्राहकः पतिः ॥ यथा ॥ त्वं पीयूषम
यूख मुंच शिशिरस्निग्धा नया यामिकरं स्त्वं भोगींद्र विलंबसे किमु फणाभोगैः शनैर्वीजय ॥ त्वं स्वर्वाहिनि किं
च सिंच सलिलैरंगैः किरीटोपमैः सेयं शैलसुता कठोरमहसः कांत्या परिक्लाम्यति ॥ ९३ ॥ अनुकूलदक्षिण
धृष्टशठभेदात्पतिश्चतुर्धा ॥ सार्वकालिकपरांगनापराङ्मुखत्वे सति सर्वकालमनुरक्तोऽनुकूलः ॥ यथा ॥ द
ष्टिस्त्वं भव कोमला दिनमणे त्वं शीतमंगीकुरु त्वं वर्त्मन् लघुतां प्रयाहि पवन त्वं वेदमुत्सारय ॥ मां निर्धं श्रयदं
डका वनगिरे निर्गच्छ मार्गाद्बहिः सीतासौ विपिनं मया सदयतो निर्गंतुमुत्कंठते ॥ ९४ ॥ सकलनायिकाविषय
कसमसहजानुरागो दक्षिणः ॥ यथा ॥ पनस्सरः स्फुरति पद्मदृशां सहस्रमक्षिद्वयं कथय कुत्र निवेशयामि ॥ इ गो॰
त्याकलय्य नयनांबुरुहे निमील्य रोमांचितेन वपुषा स्थितमच्युतेन ॥ ९५ ॥ धृष्टो निःशंककृतदोषोपि धृष्टोनि ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वारितोपि भूयः प्रश्रयपरायणो धृष्टः ॥ यथा ॥ बद्धो हारैः करकमलयोर्द्वारतो वारितोपि स्वापं त्यक्त्वा पुनरुपग
तो दूरतो दत्तदृष्टिः ॥ तल्पोपांते कनकवलयं मुक्तमन्वेषयंत्या दृष्टो धृष्टः पुनरपि मया पार्श्व एव प्रसुप्तः ॥ ८१ ॥ का
मिनीविषयकपटपटुः शठः ॥ यथा ॥ मौलौ दाम विधाय भालफलके व्यालिख्य पत्रावलीं केयूरं भुजयोर्निधाय कु
चयोर्विन्यस्य मुक्तास्रजं ॥ विश्वासं समुपार्जयन्मृगदृशः कांचीनिवेशच्छलान्नीविग्रंथिमपाकरोति मृदुना हस्ते
न वामभ्रुवः ॥ ८२ ॥ आचारहानिहेतुः पतिरुपपतिः ॥ यथा ॥ शंकाशृंखलिते न यत्र नयनप्रांतेन न प्रेक्ष्यते केयूरस्य
निःस्वनादपि भीतिचकितं नो यत्र वा श्लिष्यते ॥ नो वा यत्र शनैरलग्नदशनं बिंबाधरः पीयते नो वा यत्र निधीयते च म[illegible]
तं तत्किं रतं कामिनोः ॥ ८३ ॥ उपपतिरपि चतुर्धा ॥ परं तु शठत्वं तत्र नियतं ॥ अनियताः परे ॥ बहुलवेश्योपभोग
रसिको वैशिकः ॥ यथा ॥ कांचीकलक्वणितकोमलनाभिकांतिं पारापतध्वनिविचित्रितकंठपालिं ॥ उद्भ्रांतलो
चनचकोरमनंगरंगमाशास्महे कमपि वारविलासवत्याः ॥ ८४ ॥ वैशिकस्योत्तममध्यमाधमभेदास्त्रिधा ॥ दयि
तायाः कोपेपि उपचारपरायण उत्तमः ॥ यथा ॥ चंद्रः प्रांतमुदीक्ष्य पद्मलदृशः शोणारविंदश्रियं नो जल्प
ति न स्मितं वितनुते गृह्णाति वीटीं न वा ॥ तल्पोपांतमुपेत्य किं तु पुलकप्रांचत्कपोलस्थितिः कांतः केवलमान
तेन शिरसा मुक्तास्रजं गुंफति ॥ ८५ ॥ प्रियायाः कोपेपि यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति
स मध्यमः ॥ यथा ॥ आस्ये यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रं शोणसरोजकांति तदपि क्वापि क्षणं स्थी
यतां ॥ मालायाः करणोद्यमो मकरिकारंभः कुचांभोजयोर्धूपः कुंतलधोरणीषु सुदृशः सायंतनो दृश्यते ॥ ८६ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र· मं· १०

10

भयघृणालज्जाशून्यः कामक्रीडायामकृतकृत्याकृत्यविचारोऽधमः॥यथा॥उदयतिहि दिमस्यनैवलज्जानचकरुणा
कोपि नचभीतिलेशः॥वकुलमुकुलकोशकोमलांगींपुनरर्पितस्यकरेणपातयेथाः॥१०७॥मानीचतुरश्चशठएवांतर्भ
वति॥मानीयथा॥वाह्याकृतपरायणंतववचोवक्त्रोपमेयंमनःश्रुत्वावाचमिमामपास्यविनयंव्याजाद्बहिः
प्रस्थिते॥प्रातर्वीतविलोकनेपरिहृतालापेविहृत्ताननेप्राणेशेनिपतंतिहंतकृपणावामभ्रुवोदृष्टयः॥१०८॥वा
क्चेष्टाव्यंग्यसमागमश्चतुरः॥वचनव्यंग्यसमागमोयथा॥तमालतटालेहृदिदंतरालेकांतेनिशायास्तवनिर्गता
याः॥तटेनदीनांनिकटेवनानांघटेतघातोदरिकःसहायः॥१०९॥चेष्टाव्यंग्यसमागमोयथा॥कांतेकनकदंबी
दंकरेकिमपिकुर्वति॥आगारलिखितेभानौविंदुमिंदुमुखीददौ॥११०॥प्रोषितःपतिरुपपतिर्वैशिकश्चभवति
क्रमेणोदाहरणानि॥उद्वहंभाद्रपिकमलंशेवालंकेशपाशोवक्त्रंचंद्रोलपितममृतंमध्यदेशोमृणालं॥
ताभिःकूपोवलिरपिसरित्पल्लवःकिंचपाणिर्यस्याःसाचेदुरसिनकथंहंततापस्यशांतिः॥१११॥यांत्याःसरःस
लिलकेलिकृतेहलायव्याजादुपेत्यमयिवर्त्मनिवर्तमाने॥अंतःस्मितघ्नचमत्कृतिदत्तरंगैरंगीकृतंकिमपि
दृशा वामदृशःस्मरामि॥११२॥अधृतपरिपतन्निचोलबंधंमुषितनकारमवक्रदृष्टिपातं॥प्रकटहसितमुल्लतास्य
विंवंमुरमुहृदशःस्मरचेष्टितंस्मरामि॥११३॥अनभिज्ञोनायकोनायकाभासएव॥सयथा॥शून्येसद्मनियोजि
तावहुविधाभंगीर्वनंनिर्जनंपुष्पव्याजमुपेत्यनिर्गतमथस्फारीकृतादृष्टयः॥तोत्तूलाहरणस्थलेनविहि उं·
तोव्यक्तोचवदोरुदावेतेनापिनवेत्तिहंतकियतायनेनसत्तास्यति॥११४॥नचनायिकायाइवनायकस्यापि १०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेभेदाः संत्विति वाच्यम् ।। तस्या अवस्थाभेदेन भेदास्तस्य च स्वभावभेदेन भेदा इति विशेषात् ।। अनुकूलत्वं दक्षिण
त्वं धृष्टत्वं शठत्वं चत्वार एव नायिकस्य स्वभावा इति ।। अन्यच्च ।। अवस्थाभेदेन नायिकस्य भेदः स्यात्तदोत्कविप्रलब्ध
खंडितादयो नायकभेदाः स्वीकर्तव्याः स्युः तथा च संकेतव्यवस्थायां स्त्रीणामनागमने वा ।। असंप्रदायात् स
मागमहानात्पान्यसमागमशंकायां तत्त्वं वान्यसंभोगचिह्नितत्वं वा ना यिकानां न तु नायिकानां प्रस्तुतनतउक्ता
वनेरसाभासापत्तेरिति ।। तेषां च नर्मसचिवः ।। पीठमर्दविटचेटकविदूषकभेदाच्चतुर्धा ।। कुपितस्त्रीप्रसादकः
पीठमर्दः ।। यथा ।। कोयं कोपविधिः प्रयच्छ करुणागर्भं वचो ज्ञायतां पीयूषद्रववीर्घिकापरिमलैरामोदिनीम
दिनी ।। आस्तां वा स्पृहयालु लोचनमिदं व्यावर्तयंती मुहुर्यस्मै कुप्यसि तं स्वसंदर्शितपाहं दानिवंदामहे ।।११५
कामतंत्रकलाकोविदो विटः ।। स यथा ।। आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृंगाः स्फूर्जंति भैरवो
न निकटं प्राणेश्वरो मुंचति ।। एते सिद्धरसाः प्रसूनविशिखो वैद्यो न वद्योत्सवे मानव्याधिरसौ हठादरिकथं
त्वच्चेतसि स्यास्यति ।।११६।। संधानचतुरश्चेटकः ।। यथा ।। सा चंद्रसुंदरमुखी स च नंदसूनुर्दैवात्निकुंजभवनं स
मुपाजगाम ।। अत्रांतरे सहचरस्तरणौकठोरे पानीयपानकपटेन सरः प्रतस्थे ।।११७।। अंगादिवैकृत्येन हास्य
कारी विदूषकः ।। यथा ।। आनीय नीरजमुखीं शयनोपकंठमुत्कंठितोस्मि कुचकंचुकमोचनाय ।। अत्रांतरे मुकु
रकारि विदूषकेण प्रानस्तनस्तरुणकुक्कुटकंठनादः ।।११८।। स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः ।। वैवर्ण्यम
श्रुप्रलय इत्यष्टौ सात्विका मताः ।।११९।। यथा ।। भेदो वाचि दृशोर्जलं कुचतटे स्वेदः प्रकंपोधरे पांडुर्गंडतटीवपुःपु

र· म·
११
लकितं लीनं मनस्तिष्ठति ॥ आलस्यं नयनश्रियश्चरणयोः स्तंभः समुत्तंभते तत्किं राजपथे नियामधरणीपालोय
मालोकितः ॥ ११९ ॥ रतिस्थायिभावः शृंगारः सच द्विविधः संभोगो विप्रलंभश्च ॥ संभोगो यथा ॥ दियति विलोलति जल
दः स्खलति विधुः स्खलति कूजति कपोतः ॥ निपतति तारकाततिरांदोलति वीचिरमरवाहिन्याः ॥ १२० ॥ विप्रलंभो यथा
प्रादुर्भूते नवजलधरे त्वत्पथे दत्तकामाः प्राणाः पंकेरुहदलदृशः कंठदेशं प्रयांति ॥ अन्यत्किं वा तव मुखविधुं द्रष्टुम
द्वीयं गते वदतः पतंगं जति बिसिनीपल्लवस्य छलेन ॥ १२१ ॥ विप्रलंभे चाभिलाषचिंतास्मृतिगुणकीर्तनोद्वेगप्रला
पोन्मादव्याधिजडतानिधनानि दशावस्था भवंति ॥ तत्र संगमेच्छा अभिलाषः ॥ यथा ॥ तस्यां स्तनतटसरस्यां चेतो नय
नं च निःपतितं ॥ गुरु चेतो विनिमग्नं लघु नयनं सर्वतो भ्रमति ॥ १२२ ॥ दर्शनसंतोषयोः प्रकारजिज्ञासा चिंतनं
यथा ॥ मया विधेयो मुकुरः घनस्मिन्कुंजोपकंठे कलकंठनादः ॥ राधामयो विश्रमभावहंती कुर्वीत नेत्रोत्पल
तोरणानि ॥ १२३ ॥ प्रियाश्रितचेष्टाद्युद्बोधितसंस्कारजन्यं ज्ञानं स्मृतिः ॥ यथा ॥ सामोलक्ष्मणदीर्घदुःखचकितो
नाविः करोति व्यथां ध्वासंतो सृजति रंजहाति मल्लिलं घनेनवाचक्षुषि ॥ वातावर्तविवर्तमानदहनक्रूरैरनंग
ज्वरैः क्षामः कि तद्विदेहदुहिता जततनयां भूयः स्मरन्वर्तते ॥ १२४ ॥ विरह कालीनकांताविषयकप्रशंसाप्रति
पादनं गुणकीर्तनं ॥ यथा ॥ स्पर्शः स्तननटस्पर्शो वीक्षणं वक्त्रवीक्षणं ॥ तस्याः केलिकथालापसमयः समयः स
खि ॥ १२५ ॥ कामक्लेशजनितसकलविषयद्वेषता ज्ञानमुद्वेगः ॥ यथा ॥ गरलद्रुमकंदमिंदुबिंबं करुणावारिजवा ऊं·
रणो वसंतः ॥ रजनी स्मरभूपतेः कृपाणी करणीयं किमतः परं वियातः ॥ १२६ ॥ प्रियाश्रितकाल्पनिकव्यवहारः प्र ११

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लापः॥ कल्पनायाः कारणमंतःकरणविक्षेपः॥ तस्य च निदानमुत्कंठा॥ यथा॥ अक्ष्णि संवीक्षणं च दूरहृदि संमी-
लनं मम॥ अक्ष्णि संस्पर्शनः पाणिरद्य मे किं करिष्यति॥ १२७॥ उन्मादः संतापादिकारितमनोविपर्यासमुत्थित
प्रियाश्रित इव व्यापार उन्मादः॥ व्यापारः कायिको वाचिकश्च॥ कायिको यथा॥ प्रतिफलममृतांशोः प्रेक्ष्य कां-
तो मृगाक्ष्या मुखमिति परिहासं कर्तुमभ्युद्यतोऽभूत्॥ अथ शिथिलितवाचो मानमाशंक्य तस्याः स्पृशति पुलक-
भाजा पाणिपंकेरुहेण॥ १२८॥ वाचिको यथा॥ किं रे मयोन्मृगदृशो मुखमद्वितीयं कंदर्पदर्पहमपि स्मितदंतुरं न मन्यदे-
व॥ भो कार मा वदसि भृंगतनूनेनाहं कामो लिपिधिक्कुपुनरीदृशमीदृगलीयं॥ १२९॥ मदनवेदनासमुत्थसंतापसो-
कार्श्यादिदोषो व्याधिः॥ यथा॥ कोदंडं विशिखो मनो निवसतिः कामस्य तस्या अपि भ्रूवल्लीनयनो चलं मन मि-
ते वासः समुन्मीलति॥ इत्थं साम्यविधौ नयोः प्रभवति स्वामी तथापि स्थितां तन्वाना तनुतां क्रमादतनुता-
मेषा यथा गच्छति॥ १३०॥ विरहव्यथाविकारमात्रवेद्यजीवनावस्थानं जडता॥ यथा॥ पाणिर्नीरवकंकणः स्त-
नतटी निःकंपमानांशुका दृष्टिर्निश्चलतारका समभवन्निस्पांडवक्त्रांडलं॥ कश्चिन्नार्पितया समंहृद्घातनो भ-
दो भवन्नो यदि त्वन्नामस्मरणेन कोपि पुलकारंभः समुज्जृंभते॥ १३१॥ स्वप्नचित्रसाक्षाद्भेदेन त्रिधा॥ स्वप्न-
दर्शनं यथा॥ मुक्ताहारं न वक्षसि गिरेः कंकणं नैव हस्तात्कर्णात्स्वर्णाभरणमपि वानीतवान्नैव तावत्॥ अद्य
स्वप्ने वकुलमुकुलं भूषणं संदधानः कोयं चोरो हृदयमहरत्तन्वि तन्न प्रतीमः॥ १३२॥ चित्रदर्शनं यथा॥ नी-
वीं हरेडरसिजं विलिखन्नखेन दंतच्छदं च दशनेन दशत्कस्मात्॥ इत्थं पटे पुलिखितं दयितं विलोक्य बा-
ला पुरेव नजहार विहारशंकाम्॥ १३३॥ साक्षाद्दर्शनं यथा॥ चेतश्चंचलतां त्यजत्प्रियसखि व्रीडे न मां पीड-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र॰
म॰
१२ स्नात्वार्मुं च दृशो निमेषभगवान्कामश्च लक्ष्मणस्यतां॥ वन्दे मूर्धनि कर्णयोः कुवलयं वंशं दधानः करे सो यं लोचन
गोचरो भवति मे दामोदरः सुन्दरः॥१३७॥ माध्वीकस्यंदसंदोहसुंदरी रसमंजरी॥ अर्पितं कवयः कर्णभूषणं कृपया
मम॥१३८॥ तातो यस्य गणेश्वरः कविकुलालंकारचूडामणिर्देशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्मीरिता
12 पद्येन स्वकृतेन तेन कविना श्रीभानुनायोजिता वाग्देवीश्रुतिपारिजातकुसुमस्पर्धाकरी मंजरी॥१३९॥ इति
श्रीभानुदत्तमिश्रविरचिता रसमंजरी समाप्ता॥ ॥ ग्रंथसंख्या ४६०॥ बालकरामाणंदतस्य पुस्तकः॥





CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative